# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-1(Old SEM-2) | **प्रश्नपत्रम्** - ५ (Old Sem) | **गुणाः** - ७० |
| **विषयः** - साहित्यम् (ऐच्छिकम्) | **कोड- CE- 422** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - १५/०४/२०१९ | **सन्दर्भग्रन्थः**- मुद्राराक्षसम् - नाटकम् | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः१( क ) अधोलिखितश्लोकयोः एकस्य ससन्दर्भप्रसङ्गं व्याख्यां लिखत । ०४**

१. स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः ।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥

२. सुलभेष्वर्थलाभेषु परसंवेदने जनः ।
क इदं दुष्करं कुर्यादिदानीं शिबिना विना ॥

**( ख ) कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत । १२**

१. श्रीविशाखदत्तस्य जीवनपरिचयः ।

२. मुद्राराक्षसनाटकस्य विषयवस्तु निरूप्य प्रथमाङ्कस्य सारं लिखत ।

**( ग ) अधोलिखितेषु सूक्तिद्वयं चर्चयत । ०४**

१. फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ।

२. न शाले: स्तम्बकरिता वप्तुर्गुणमपेक्षते ।

३. नन्दोन्मूलनदृष्टवीर्य्यमहिमा बुद्धिस्तु मा गान्मम ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः२( क ) अधोलिखितश्लोकयोः एकस्य ससन्दर्भप्रसङ्गं व्याख्यां लिखत । ०८**

१. अस्माभिरमुमेवार्थमालम्ब्य न जिजीविषाम् ।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥

२. विनयरुचयस्तस्मात् सन्तः सदैव निरङ्कुशाः
परतरमतः स्वातन्त्र्येभ्यो वयं हि पराङ् मुखाः ॥

**( ख ) अधोलिखितेषु सूक्तिद्वयं चर्चयत । ०८**

१. पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ।

२. मनस्वी दम्यत्वात् स्खलति न च दुःखं वहति च ।

**( ग ) केषाञ्चित् त्रयाणां लघूत्तराणि लेख्यानि । ०३**

१. कः प्रियंवदकः?

२. तृतीयाङ्के कति श्लोकाः सन्ति?

३. अस्मिन्नाटके प्रधाननायकः कोऽस्ति?

४ द्वितीयाङ्कस्य नाम किम्?

५. राक्षसस्य मित्रं कः?

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः३ ( क ) अधोलिखितश्लोकयोः एकस्य ससन्दर्भप्रसङ्गं व्याख्यां लिखत । ०४**

१. सद्यः क्रीडारसच्छेदं प्राकृतोऽपि न मर्षयेत् । किं नु लोकाधिकं तेजो बिभ्राणः पृथिवीपतिः ॥

२. विष्णुगुप्तं च मौर्यञ्च सममप्यागतौ त्वया । उन्मूलयितुमीशोऽहं त्रिवर्गमिव दुर्नयः ॥

**( ख )** **कस्याप्येकस्य सारांशात्मकमुत्तरं लिखत ।** **१२**

१. चतुर्थाङ्कस्य सारांशः स्वसंस्कृतगिरा लेख्यः ।

२. विशाखदत्तस्य नाट्यशैलीविषये स्वविचारान् प्रकटयत ।

**( ग )** **कयोश्चिद् द्वयोः उत्तरं लिखत ।** **०४**

१. मलयकेतुः कस्य पुत्रः?

२. पञ्चमाङ्कस्य नाम किम्?

३. चतुर्थेऽङ्के कति श्लोकाः सन्ति?

४. कः जीवसिद्धिः?

**॥ चतुर्थान्वितिः ॥** (Unit-4)

**प्रश्नः४( क )** **अधोलिखितश्लोकयोः एकस्य ससन्दर्भप्रसङ्गं व्याख्यां लिखत ।** **०४**

१. शिवेरिव समुद्भूतं शरणागतरक्षया ।
न चीयते त्वया साधो यशोऽपि सुहृदा विना ॥

२. आकरः सर्वशास्त्राणां रत्नानामिव सागरः ।
गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम् ॥

**( ख )** **कयोश्चिद् द्वयोः पात्रपरिचयं दत्त ।** **०८**

१. सिद्धार्थकः ।

२. राक्षसः ।

३. चन्दनदासः ।

४. चाणक्यः ।

**( ग )** **केषाञ्चित् त्रयाणां लघूत्तराणि लिखत ।** **०३**

१. चन्दनदासस्य भार्यायाः नाम किम्?

२. सप्तमाङ्कस्य नाम किम्?

३. मौर्यवंशस्य सम्राजः नाम किम्?

४. षष्ठाङ्के कति श्लोकाः सन्ति?

५. अस्मिन्नाटके मुख्यो रसः कः?

०००